# શ્રીમહાવિદ્યા વૈષ્ણવી કવચસ્તોત્રમ્

Shri Mahavidya Vaishnavi Kavachastotram

sanskritdocuments.org

August 10, 2019

# Shri Mahavidya Vaishnavi Kavachastotram

# શ્રીમહાવિદ્યા વૈષ્ણવી કવચસ્તોત્રમ્

## Sanskrit Document Information

Text title : Shri Mahavidya Vaishnavi Kavachastotram

File name : mahAvidyAvaiShNavIkavachastotram.itx

Category : devii, dashamahAvidyA, kavacha

Location : doc_devii

Latest update : August 10, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 10, 2019

*sanskritdocuments.org*

Shri Mahavidya Vaishnavi Kavachastotram

# શ્રીમહાવિદ્યા વૈષ્ણવી કવચસ્તોત્રમ્

શ્રીભગવાનુવાચ-
અસ્ય મન્ત્રસ્ય કવચં શૃણુ વેતાલભૈરવ ।
વૈષ્ણવીતન્ત્રસંજ્ઞસ્ય વૈષ્ણવ્યાશ્ચ વિશેષતઃ ॥ ૧॥

તત્ર મન્ત્રાદ્યક્ષરં તુ વાસુદેવસ્વરૂપધૃક્ ।
વર્ણો દ્વિતીયો બ્રહ્મૈવ તૃતીયશ્ચન્દ્રશેખરઃ ॥ ૨॥

ચતુર્થો ગજવક્ત્રશ્ચ પઞ્ચમસ્તુ દિવાકરઃ ।
શક્તિઃ સ્વયં પકારશ્ચ મહામાયા જગન્મયી ॥ ૩॥

યકારસ્તુ મહાલક્ષ્મીઃ શેષવર્ણઃ સરસ્વતી ।
યોગિની પૂર્વવર્ણસ્ય શૈલપુત્રી પ્રકીર્તિતા ॥ ૪॥

દ્વિતીયસ્ય તુ વર્ણસ્ય ચણ્ડિકા યોગિની મતા ।
ચણ્ડઘણ્ટા તૃતીયસ્ય કૂષ્માણ્ડા તત્પરસ્ય ચ ॥ ૫॥

સ્કન્દમાતા તકારસ્ય પસ્ય કાત્યાયની સ્વયમ્ ।
કાલરાત્રિઃ સપ્તમસ્ય મહાદેવીતિ સંસ્થિતા ॥ ૬॥

પ્રથમં વર્ણકવચં યોગિનીકવચં તથા ।
દેવૌઘકવચં પશ્ચાદ્દેવીદિક્કવચં તથા ॥ ૭॥

તતસ્તુ પાર્શ્વકવચં દ્વિતીયાન્તાવ્યયસ્ય ચ ।
કવચં તુ તતઃ પશ્ચાત્ ષડ્વર્ણકવચં તથા ॥ ૮॥

અભેદ્યકવચં ચેતિ સર્વત્રાણપરાયણમ્ ।
ઇમાનિ કવચાન્યષ્ટૌ યો જાનાતિ નરોત્તમઃ ।
સોઽહમેવ મહાદેવો દેવીરૂપશ્ચ શક્તિમાન્ ॥ ૯॥

ૐ અસ્ય શ્રીવૈષ્ણવીકવચસ્તોત્રમહામન્ત્રસ્ય નારાયણ ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । શ્રીમહાવિદ્યા વૈષ્ણવીકાત્યાયની દેવતા ।

સર્વાર્થસાધને જપે વિનિયોગઃ ॥

અઃ પાતુ પૂર્વકાષ્ઠાયામાગ્નેય્યાં પાતુ કઃ સદા ।
પાતુ ચો યમકાષ્ઠાયાણ્ટો નૈરૃત્યાં ચ સર્વદા ॥ ૧૦॥

માં પાતુ તોડસૌ પાશ્ચાત્યે શક્તિર્વાયવ્યદિગ્ગતા ।
મૂર્ધ્નિ રક્ષતુ માં સોડસૌ બાહૌ માં દક્ષિણે તુ કઃ ।
માં વામબાહૌ ચ પાતુ હૃદિ તો માં સદાવતુ ॥ ૧૧॥

તઃ પાતુ કણ્ઠદેશે માં કટ્યોઃ શક્તિસ્તથાવતુ ।
યઃ પાતુ દક્ષિણે પાદે શો માં વામપદે તથા ॥ ૧૨॥

શૈલપુત્રી તુ પૂર્વસ્યાંઆગ્નેય્યાં પાતુ ચણ્ડિકા ।
ચણ્ડાઘણ્ટા પાતુ યામ્યાં યમભીતિવિમર્દિની ॥ ૧૩॥

નૈરૃત્યે ત્વથ કૂષ્માણ્ડા પાતુ માં જગતાં પ્રસૂઃ ।
સ્કન્દમાતા પશ્ચિમાયાં માં રક્ષતુ સદૈવ હિ ॥ ૧૪॥

કાત્યાયની માં વાયવ્યે પાતુ લોકેશ્વરી સદા ।
કાલરાત્રી તુ કૌબેર્યાં સદા રક્ષતુ માં સ્વયમ્ ॥ ૧૫॥

મહાગૌરી તથૈશાન્યાં સતતં પાતુ પાવની ।
નેત્રયોર્વાસુદેવો માં પાતુ નિત્યં સનાતનઃ ॥ ૧૬॥

બ્રહ્મા માં પાતુ વદને પદ્મયોનિરયોનિજઃ ।
નાસાભાગે રક્ષતુ માં સર્વદા ચન્દ્રશેખરઃ ॥ ૧૭॥

ગજવક્ત્રઃ સ્તન્યયુગ્મે પાતુ નિત્યં હરાત્મજઃ ।
વામદક્ષિણપાણ્યોર્માં નિત્યં પાતુ દિવાકરઃ ॥ ૧૮॥

મહામાયા સ્વયં નાભૌ માં પાતુ પરમેશ્વરી ।
મહાલક્ષ્મીઃ પાતુ ગુહ્યે જાનુની તુ સરસ્વતી ॥ ૧૯॥

મહામાયા પૂર્વભાગે નિત્યં રક્ષતુ માંશુભા ।
અગ્નિજ્વાલા તથાગ્નેય્યાં પાયાન્નિત્યં વરાસની ॥ ૨૦॥

રુદ્રાણી પાતુ માં યામ્યાં નૈરૃત્યાં ચણ્ડનાયિકા ।
ઉગ્રચણ્ડા પશ્ચિમાયાં પાતુ નિત્યં મહેશ્વરી ॥ ૨૧॥

પ્રચણ્ડા પાતુ વાયવ્યે કૌબેર્યાં ઘોરરૂપિણી ।
ઈશ્વરી ચ તથૈશાન્યાં પાતુ નિત્યં સનાતની ॥ ૨૨॥

ઊર્ધ્વે પાતુ મહામાયા પાત્વધઃ પરમેશ્વરી ।
અગ્રતઃ પાતુ મામુગ્રા પૃષ્ઠતો વૈષ્ણવી તથા ॥ ૨૩॥

બ્રહ્માણી દક્ષિણે પાર્શ્વે નિત્યં રક્ષતુ શોભના ।
કૌમારી પર્વતે પાતુ વારાહી સલિલે ચ મામ્ ॥ ૨૪॥

નારસિંહી દંષ્ટ્રિભયે પાતુ માં વિપિનેષુ ચ ।
ઐન્દ્રી માં પાતુ ચાકાશે તથા સર્વજલે સ્થલે ॥ ૨૫॥

સેતુઃ સર્વાઙ્ગુલીઃ પાતુ દેવાદિઃ પાતુ કર્ણયોઃ ।
દેવાન્તશ્ચિબુકે પાતુ પાર્શ્વયોઃ શક્તિપઞ્ચમઃ ॥ ૨૬॥

હા પાતુ માં તથૈર્વોર્વોર્માયા રક્ષતુ જઙ્ઘયોઃ ।
સર્વેન્દ્રિયાણિ મે પાતુ રોમકૂપેષુ સર્વદા ॥ ૨૭॥

ત્વચિ માં વૈ સદા પાતુ માંશમ્ભુઃ પાતુ સર્વદા ।
નખદન્તકરોષ્ઠાદૌ યો માં પાતુ સદૈવ હિ ॥ ૨૮॥

દેવાદિઃ પાતુ માં હસ્તૌ દેવાન્તઃ સ્તનકક્ષયોઃ ।
એતદાદૌ તુ યઃ સેતુર્બાહ્યે માં પાતુ દેહતઃ ॥ ૨૯॥

આજ્ઞાચક્રે સુષુમ્નાયાંષટ્ચક્રે હૃદિસન્ધિષુ ।
આદિષોડશચક્રે ચ લલાટાકાશ એવ ચ ॥ ૩૦॥

વૈષ્ણવીતન્ત્રમન્ત્રશ્ચ માં નિત્યં રક્ષતાત્સદા ।
કર્ણનાડીષુ સર્વાસુ પાર્શ્વકક્ષશિખાસુ ચ ॥ ૩૧॥

રુધિરસ્નાયુમજ્જાસુ મસ્તિષ્કેષુ ચ પર્વસુ ।
દ્વિતીયાષ્ટાક્ષરો મન્ત્રઃ કવચં પાતુ સર્વતઃ ॥ ૩૨॥

રેતો વાયૌ નાભિરન્ધ્રે પૃષ્ઠસન્ધિષુ સર્વતઃ ।
ષડક્ષરસ્તૃતીયોઽયં મન્ત્રો માં પાતુ સર્વદા ॥ ૩૩॥

નાસારન્ધ્રે મહામાયા કણ્ઠરન્ધ્રે તુ વૈષ્ણવી ।
સર્વસન્ધિષુ માં પાતુ દુર્ગા દુર્ગાર્તિહારિણી ॥ ૩૪॥

શ્રોત્રયોર્હું ફડિત્યેવં નિત્યં રક્ષતુ કાલિકા ।
નેત્રબીજત્રયં નેત્રે સદા તિષ્ઠતુ રક્ષિતુમ્ ॥ ૩૫॥

ૐ ઐં હ્રીં હ્રૌં નાસિકાયાં રક્ષન્તી ચાસ્તુ ચણ્ડિકા ।

ॐ હ્રીં હૂં માં સદા તારા જિહ્વમૂલે તુ તિષ્ઠતુ ॥ ૩૬॥

હૃદિ તિષ્ઠતુ મે સેતુર્જ્ઞાનં રક્ષિતુમુત્તમમ્ ।
ॐ ક્ષ્રૌં ફટ્ ચ મહામારી પાતુ માં સર્વતઃ સદા ॥ ૩૭॥

ॐ જૂં સઃ કૌશિકી માં પ્રાણન્ રક્ષતુ રક્ષિતા ।
ॐ હ્રીં હૂં માં ભર્ગદયિતા દેહશૂન્યેષુ પાતુ મામ્ ॥ ૩૮॥

ॐ મઃ સદાશૈલપુત્રી સર્વાનોગ્રાન્ પ્રમૃજ્યતામ્ ।
ॐ હ્રીં સઃ સ્ફેં ક્ષઃ ફડસ્ત્રાય સિંહવ્યાઘ્રભયાદ્રણાત્ ॥ ૩૯॥

શિવદૂતી પાતુ નિત્યં હ્રીં સર્વાસ્ત્રેષુ તિષ્ઠતુ ।
ॐ હ્રાં હ્રીં સઃ ચણ્ડઘણ્ટા કર્ણછિદ્રેષુ પાતુ મામ્ ॥ ૪૦॥

ॐ હ્રીં સઃ કામેશ્વરી કામાનભિતિષ્ઠતુ રક્ષતુ ।
ॐ આં હૂં ફટ્ ઉગ્રચણ્ડા રિપૂન્ વિઘ્નાન્ વિમર્દતામ્ ॥ ૪૧॥

ॐ આં લાં પાતુ માં નિત્યં વૈષ્ણવી જગદીશ્વરી ।
ॐ કં બ્રહ્માણી પાતુ ચક્રાત્ ॐ ચં રુદ્રાણી તુ શક્તિતઃ ॥ ૪૨॥

ॐ ટં કૌમારી પાતુ વજ્રાત્ ॐ તં વારાહી તુ કાણ્ડતઃ ।
ॐ પં પાતુ નારસિંહી માં ક્રવ્યાદેભ્યસ્તથાસ્ત્રતઃ ॥ ૪૩॥

શસ્ત્રાસ્ત્રેભ્યઃ સમસ્તેભ્યો યન્ત્રેભ્યોઽનિષ્ટમન્ત્રતઃ ।
ચણ્ડિકા માં સદા પાતુ ॐ યં સં દેવ્યૈ નમો નમઃ ॥ ૪૪॥

વિશ્વાસઘાતકેભ્યો મામૈન્દ્રી રક્ષતુ મન્મનઃ ।
ॐ નમો મહામાયાયૈ ॐ વૈષ્ણવ્યૈ નમો નમઃ ।
રક્ષ માં સર્વભૂતેભ્યઃ સર્વત્ર પરમેશ્વરી ॥ ૪૫॥

આધારે વાયુમાર્ગે હૃદિ કમલદલે ચન્દ્રવત્સ્મેરસૂર્યે
    હસ્તૌ વહ્નૌ સમિદ્ધે વિશતુ વરદયામન્ત્રમષ્ટાક્ષરં તત્ ।
યદ્બ્રહ્મા મૂર્ધ્નિ ધત્તે હરિરવતિ ગલે ચન્દ્રચૂડો હૃદિસ્થં
    તન્માં પાતુ પ્રધાનં નિખિલમતિશયમ્પ્રપ્રગર્ભાભબીજમ્ ॥ ૪૬॥

આદ્યાઃ શેષાઃ સ્વરૌઘૈર્નમયબલવરૈરસ્વરેણાપિ યુક્તૈઃ
    સાનુસ્વારા વિસર્ગૈર્હરિહરવિદિતં યત્સહસ્રં ચ સાષ્ટમ્ ।
મન્ત્રાણાં સેતુબન્ધં નિવસતિ સતતં વૈષ્ણવીતન્ત્રમન્ત્રે
    તન્માં પાયાત્પવિત્રં પરમવરમજમ્ભૂતલવ્યોમભાગે ॥ ૪૭॥

અઙ્ગાન્યષ્ટૌ તથાષ્ટૌ વસવ ઇહ તથૈવાષ્ટમૂર્તિર્દલાનિ
    પ્રોક્તાન્યષ્ટૌ તથાષ્ટૌ મધુમતિરચિતાઃ સિદ્ધયોઽષ્ટૌ તથૈવ ।
અષ્ટાવષ્ટાષ્ટસઙ્ખ્યા જગતિ રતિકલાઃ ક્ષિપ્રકાષ્ટાઙ્ગયોગા
    મય્યષ્ટાવક્ષરાણિ ક્ષરતુ સહિગણો યદ્ધૃદોયસ્ત્વમૂષામ્ ॥ ૪૮॥

ફલશ્રુતિઃ -
ઇતિ તત્કવચં પ્રોક્તં ધર્મકામાર્થસાધકમ્ ।
ઇદં રહસ્યં પરમમિદં સર્વાર્થસાધકમ્ ॥ ૪૯॥

યઃ સકૃચ્છૃણુયાદેતત્કવચં યન્મયોદિતમ્ ।
સ સર્વાન્ લભતે કામાન્ પરત્ર શિવરૂપતામ્ ॥ ૫૦॥

સકૃદ્યસ્તુ પઠેદેતત્ કવચં યન્મયોદિતમ્ ।
સ સર્વયજ્ઞસ્ય ફલં લભતે નાત્ર સંશયઃ ॥ ૫૧॥

સઙ્ગ્રામેષુ જયેચ્છત્રૂન્ મતઙ્ગાનિવ કેસરી ।
દહેત્તૃણં યથા વહ્નિસ્તથાશત્રૂન્ દહેત્સદા ॥ ૫૨॥

નાસ્ત્રાણિ તસ્ય શસ્ત્રાણિ શરીરે પ્રવિશન્તિ વૈ ।
ન તસ્ય જાયતે વ્યાધિર્ન ચ દુઃખં કદાચન ॥ ૫૩॥

ગુટિકાઞ્જનપાતાલપાદલેપરસાઞ્જનમ્ ।
ઉચ્ચાટનાદ્યાસ્તાઃ સર્વાઃ પ્રસીદન્તિ ચ સિદ્ધયઃ ॥ ૫૪॥

વાયોરિવ ગતિસ્તસ્ય ભવેદન્યૈરવારિતા ।
દીર્ઘાયુઃ કામભોગી ચ ધનવાનભિજાયતે ॥ ૫૫॥

અષ્ટમ્યાં સંયુતો ભૂત્વા નવમ્યાં વિધિવચ્છિવામ્ ।
પૂજયિત્વા વિધાનેન વિચિન્ત્ય મનસાશિવામ્ ॥ ૫૬॥

યો ન્યસેત્ કવચં દેહે તસ્ય પુણ્યફલંશૃણુ ।
જિતવ્યાધિઃ શતાયુશ્ચ રૂપવાન્ ગુણવાન્ સદા ॥ ૫૭॥

ધનરત્નૌઘસમ્પૂર્ણો વિદ્યાવાન્ સ ચ જાયતે ।
નાગ્નિર્દહતિ તત્કાયં નાપઃ સઙ્ક્લેદયન્તિ ચ ॥ ૫૮॥

ન શોષયતિ તં વાયુઃ ક્રવ્યાત્તન્ન હિનસ્તિ ચ ।
શસ્ત્રાણિ નૈનં છિન્દન્તિ ન તાપયતિ ભાસ્કરઃ ॥ ૫૯॥

ન તસ્ય જાયતે વિઘ્નો નાસ્તિ તસ્ય ચ સઞ્જ્વરઃ ।

વેતાલાશ્ચ પિશાચાશ્ચ રાક્ષસા ગણનાયકાઃ ॥ ૬૦॥

સર્વે તસ્ય વશં યાન્તિ ભૂતગ્રામાશ્ચતુર્વિધાઃ ।
નિત્યં પઠતિ યો ભક્ત્યા કવચં હરનિર્મિતમ્ ॥ ૬૧॥

સોઽહમેવ મહાદેવો મહામાયા ચ માતૃકા ।
ધર્માર્થકામમોક્ષાશ્ચ તસ્ય નિત્યં કરે સ્થિતાઃ ॥ ૬૨॥

અન્યસ્ય વરદઃ સો વૈ નિત્યં ભવતિ પણ્ડિતઃ ।
કવિત્વં સત્યવાદિત્વં સતતં તસ્ય જાયતે ॥ ૬૩॥

વદેત્ શ્લોકસહસ્રાણિ ભવેત્ શ્રુતિધરસ્તથા ।
લિખિતં યસ્ય ગેહે તુ કવચં ભૈરવસ્થિતમ્ ॥ ૬૪॥

ન તસ્ય દુર્ગતિઃ ક્વાપિ જાયતે તસ્ય દૂષણમ્ ।
ગ્રહાશ્ચ સર્વે તુષ્યન્તિ વશં ગચ્છન્તિ ભૂમિપાઃ ॥ ૬૫॥

યદ્રાજ્યે કવચજ્ઞોઽસ્તિ જાયન્તે તત્ર નેતયઃ ।
સેતુર્દેવઃ શક્તિબીજં પઞ્ચમો હાયને નમઃ ॥ ૬૬॥

વાયુર્બલેન ચૈતાયૈ દ્વિતીયાષ્ટાક્ષરં ત્વિદમ્ ।
સેતુર્દેવોઽથ વૈષ્ણવ્યૈ ષડક્ષરમિદં સ્મૃતમ્ ॥ ૬૭॥

એતદ્વયં તુ જિહ્વાગ્રે સતતં યસ્ય વર્તતે ।
તસ્ય દેવી મહામાયા કાયે તિષ્ઠતિ વૈ સદા ॥ ૬૮॥

મન્ત્રાણાં પ્રણવઃ સેતુઃ તત્સેતુઃ પ્રણવઃ સ્મૃતઃ ।
ક્ષરત્યનોઙ્કૃતં પૂર્વં પરસ્તાચ્ચ વિશીર્યતે ॥ ૬૯॥

નમસ્કારો મહામન્ત્રો દેવ ઇત્યુચ્યતે સુરૈઃ ।
દ્વિજાતીનામયં મન્ત્રઃ શૂદ્રાણાં સર્વકર્મણિ ॥ ૭૦॥

અકારં ચાપ્યુકારં ચ મકારં ચ પ્રજાપતિઃ ।
વેદત્રયાત્સમુદ્ધૃત્ય પ્રણવં નિર્મમે પુરા ॥ ૭૧॥

સ ઉદાત્તો દ્વિજાતીનાં રાજ્ઞાં સ્યાદનુદાત્તકઃ ।
પ્રચિતશ્ચોરુજાતાનાં મનસાપિ તથા સ્મરેત્ ॥ ૭૨॥

ચતુર્દશસ્વરો યોઽસૌ શેષ ઔકારસંજ્ઞકઃ ।
સ ચાનુસ્વારચન્દ્રાભ્યાંશૂદ્રાણાં સેતુરુચ્યતે ॥ ૭૩॥

નિઃસેતુ ચ યથા તોયં ક્ષણાન્નિમ્નં પ્રસર્પતિ ।
મન્ત્રસ્તથૈવ નિઃસેતુઃ ક્ષણાત્ ક્ષરતિ યજ્જ્વનામ્ ॥ ૭૪॥

તસ્માત્સર્વત્ર મન્ત્રેષુ ચતુર્વર્ણા દ્વિજાતયઃ ।
પાર્શ્વયોઃ સેતુમાદાય જપકર્મ સમાચરેત્ ॥ ૭૫॥

શૂદ્રાણામાદિસેતુર્વા દ્વિઃ સેતુર્વા યથેચ્છતઃ ।
દ્વિઃ સેતવઃ સમાખ્યાતાઃ સર્વદૈવ દ્વિજાતયઃ ॥ ૭૬॥

ઔર્વ ઉવાચએતત્તે સર્વમાખ્યાતં કવચં ત્ર્યમ્બકોદિતમ્ ।
અભેદ્યં કવચં તત્તુ કવચાષ્ટકમુત્તમમ્ ॥ ૭૭॥

મહામાયામન્ત્રકલ્પં કવચં મન્ત્રસંયુતમ્ ।
ષડક્ષરસમાયુક્તં ત્રિષુ લોકેષુ દુર્લભમ્ ॥ ૭૮॥

એત્તત્વં નૃપશાર્દૂલ નિત્યં ભક્તિયુતઃ પઠન્ ।
જપન્ મન્ત્રં ચ વૈષ્ણવ્યાઃ સર્વસિદ્ધિમવાપ્સ્યસિ ॥ ૭૯॥

ઇતિ શ્રીમહાવિદ્યા વૈષ્ણવી કવચસ્તોત્રં સમ્પૂર્ણમ્ ।

---

*Shri Mahavidya Vaishnavi Kavachastotram*
pdf was typeset on August 10, 2019

Please send corrections to *sanskrit@cheerful.com*